सवत्साऽलङ्कृतां धेनुं गोविन्द! प्रीयतामिति ॥
एवं विप्राय तां दद्यात् कृत्वा चैव प्रदक्षिणम् ।
अनुव्रजेच्च गच्छन्तं पदान्यष्टौ नराधिप! ॥
अनेन विधिना यस्तु कामधेनुं प्रयच्छति ।
सर्व्वकामसमृद्धार्थः स्वर्गलोकञ्च गच्छति ॥
किं दत्त्वा शतशोर्व्वन्तु राहुग्रस्ते दिवाकरे ।
तत्फलं प्राप्यते राजन् कामधेन्वा यदश्नुते" ॥
इत्याद्ये वह्निपुराणे कामधेनुप्रदाननामाध्यायः ॥*॥
अन्यत् वाल्मीकीयरामायणे बालकाण्डे ५३ सर्गे महाभारते १ । १०१ अध्याये च द्रष्टव्यम् ॥ * ॥

अथ कामधेनुमहादानम् ।

"अथातः संप्रवक्ष्यामि कामधेनुविधिं परम् ।
सर्व्वकामफलं नॄणां महापातकनाशनम् ॥
लोकेशावाहनं तद्वद्धोमकर्म्माधिवासनम् ।
तुलापुरुषवत्कार्य्यं कुण्डमण्डपवेदिकम् ॥
स्वल्पे ह्येकाग्निवत् कुर्य्यात् गुरुरेव समाहितः ।
काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत्" ॥

धेनुं वत्सञ्चेत्यनेन धेन्वर्थोपात्तसुवर्णेनैव स्वेच्छया वत्सकल्पनमुक्तम् ॥

"उत्तमा पलसाहस्री तदर्द्धेन तु मध्यमा ।
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता ॥
शक्तितस्त्रिपलादूर्द्धमशक्तोऽपीह कारयेत् ।
वेद्यां कृष्णाजिनं न्यस्य गुड़प्रस्थसमन्वितम् ॥
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् ।
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्" ॥

महारत्नैरुत्कृष्टरत्नैः ॥

"तथाष्टादश धान्यानि समन्तात् परिकल्पयेत् ।
इक्षुदण्डाष्टकं तद्वन्नानाफलसमन्वितम् ।
भाजनञ्चासनं तद्वत्ताम्रदोहनकन्तथा ॥
कौषेयवस्त्रद्वयसंप्रयुक्तां
दीपातपत्राभरणाभिरामाम् ।
सचामरां कुण्डलिनीं सघण्टां
मणिच्छिकां चन्द्रकरौप्यपादाम्" ॥

मणिच्छिका अक्षमाला ।

"रसैश्च सर्व्वैः पुरतोऽभिजुष्टां
हरिद्रया पुष्पफलैरनेकैः ।
अजाजिकुस्तुम्बुरुशर्कराभि-
र्व्वितानकञ्चोपरि पञ्चवर्णम्" ।

रसैः सर्व्वैरिति लवणादिभिः षड्भिः । अजाजी जीरकः । कुस्तुम्बुरु धन्याकम् ॥

"स्नातस्ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य सपुष्पहस्तः ।
आवाहयेत्तां गुड़धेनुमन्त्रै-
र्द्विजाय दद्यादथ दर्भपाणिः" ॥

बहुतरमत्स्यपुराणपुस्तकेषु गुड़धेनुमन्त्रैरिति पाठदर्शनात् गुड़धेनूक्तया लक्ष्मीरित्यादिमन्त्रपाठश्चात्र कर्त्तव्यः । द्विजाय दद्यादिति श्रुतेः तस्मैव कामधेनुर्गुरवे देया ऋत्विग्भ्यस्तु दक्षिणामात्रम् ॥

"त्वं सर्व्वदेवगणमन्दिरमङ्गभूता
विश्वेश्वरत्रिपथगोदधिपर्व्वतानाम् ।
तद्दानशस्त्रशकलीकृतपातकौघः
प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि ॥
लोके यथेप्सितफलार्थविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्यः ।
संसारदुःखशमनाय यतस्व कामं
त्वां कामधेनुमिति देवगणा वदन्ति ॥
आमन्त्र्य शीलकुलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात् ।
प्राप्नोति धाम स पुरन्दरदेवजुष्टं
कन्यागणैः परिवृतः पदमिन्दुमौलेः" ॥*॥

अत्र यजमानः समुपगतकामधेनुमहादानेच्छः तुलापुरुषलिखितं खड्गचर्म्ममयाच्छन्नसन्नाहतुलापुरुषस्थापनीयहरिप्रतिमासालङ्कारतुलाहस्तप्राप्तप्रतिमावर्ज्जिःसर्व्वसम्भारमधिकत्वेन सुवर्णपलसहस्रनिर्म्मितामुत्तमां सुवर्णपलशतपञ्चकनिर्म्मितां मध्यमां सुवर्णसार्द्धपलशतद्वयनिर्म्मितां कनीयसीं अशक्तौ पलत्रयादूर्द्धं यथाशक्त्युपात्तसुवर्णघटितामुत्कृष्टरत्नालङ्कृतां सवत्सां धेनुम् । धेन्वस्थापनार्थं कृष्णाजिनं गुड़प्रस्थञ्च धेन्वलङ्करणार्थं यथेच्छकाञ्चनघटितचन्द्रतिलकललाटपट्टिकाकुण्डलयुगघण्टारौप्यखुरचतुष्टयस्फाटिकाक्षमालाचामराणि । धेन्वाच्छादनार्थं कौषेयवस्त्रयुगम् । धेनुपार्श्वस्थापनार्थं कुम्भाष्टकातिप्रचुरविविधफलाष्टादशधान्येक्षुदण्डाष्टककांस्यपात्रासनताम्रदोहनदीपसामग्रीछत्रपादुकायुगानि । धेन्वग्रतः स्थापनार्थं मधुरादिरसषट्कहरिद्रानानाविधकुसुमार्द्रद्रव्यजीरकधन्याकशर्कराश्चोत्पादयेत् । ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने गुर्व्वृत्विग्यजमानजापकास्तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने हिरण्यकामधेनुपदं प्रक्षिप्य निवेदनं सङ्कल्पञ्च कुर्य्युः । अपरदिने च यजमानस्तुलापुरुषवद्गोविन्दाद्याराधनादिमधुपर्कदानान्तं गोविन्दाद्यभ्यर्चनब्राह्मणानुज्ञापनदानसंकल्पपुण्याहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने हिरण्यकामधेनुपदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानजापका उपवसेयुः । अपरदिने च कृतनित्यास्तुलापुरुषवदभिस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म्म यथायथं कुर्य्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम् । तत ऋत्विजः सवत्सां धेनुं प्रधानवेदीमध्यलिखितचक्रोपरि कृष्णाजिनमास्तीर्य्य तदुपरि गुड़प्रस्थं निधाय तत्रारोप्य पूर्व्वोक्तालङ्कारैरलङ्कृत्य कौषेयवस्त्रयुगेनाच्छाद्य धेनुपार्श्वे च पूर्णकुम्भाष्टकं नानाविधफलानि अष्टादशधान्यानि रत्नानानाविधफलमिक्षुदण्डाष्टककांस्यभाजनपट्टिकाताम्रदोहनदीपातपत्रपादुकायुगान्यारोपयेयुः । धेन्वग्रतः मधुरादिरसषट्कहरिद्राविविधपुष्पार्द्रशामग्रीजीरकधन्याकशर्कराश्चारोप्य मङ्गलगीतवाद्यवन्दिघोषेषु यज्ञकुण्डसमीपस्थकुम्भचतुष्टयजलेन स्वस्ववेदोक्ताभिषेचनिकमन्त्रैर्यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्व्वालङ्कारः कुशहस्तः पुष्पाञ्जलिमादाय कामधेनुं प्रदक्षिणीकृत्य या लक्ष्मीरित्यादि देवगणा वदन्तीत्यन्तं पठित्वा कामधेनुं पुष्पाञ्जलिना सम्पूज्य गुरवे दद्यात् । तद्यथा, ओँ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकशर्म्मणे तुभ्यं मत्स्यपुराणोक्तहिरण्यकामधेनुमहादानफलप्राप्तिकामोऽहं एतां कृष्णाजिनन्यस्तगुड़प्रस्थारोपितां उत्कृष्टरत्नसौवर्णचन्द्रतिलकपट्टककुण्डलयुगलघण्टारौप्यखुरस्फाटिकाक्षमालाचामरालंकृतां कौषेयवस्त्रयुगाच्छादितां पूर्णकुम्भाष्टकनानाफलाष्टादशधान्यफलसहितेक्षुदण्डाष्टककांस्यपात्रासनताम्रदोहनदीपछत्रपादुकायुगषड्रसहरिद्रानानाविधकुसुमफलजीरकधन्याकशर्करायुतां पञ्चवर्णवितानकसहितां सवत्सां हिरण्यकामधेनुं ददे । गुरुः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा हिरण्यकामधेनुरियं विष्णुदैवतेति उक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततो गुर्व्वृत्विग्भ्यो दक्षिणान्दद्यात् । ओँ अद्य कृतैतद्दानदक्षिणामिमां उत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददे । स्वस्तीति ब्राह्मणा ब्रूयुः । गुरुस्तु स्वस्त्यनन्तरं धेनुपुच्छं गृह्णीयात् । ततो यजमानस्तुलापुरुषवज्जापकेभ्यो दक्षिणां दत्त्वा दीनानाथादींस्तर्पयित्वा ब्राह्मणवाचनञ्च कृत्वा त्वरया गुरवे कामधेनुं प्रतिपादयेत् । पलत्रयादूर्द्धं यथाशक्ति स्वल्पमहादानदाने तु गुरुरेव स्वगृह्योक्तविधिना सर्व्वं ब्रह्माण्डवत् कुर्य्यात् ॥ इति हिरण्यकामधेनुमहादानं समाप्तम् । इति दानसागरः ॥

कामध्वंसी, [न्] पुं, (कामं कन्दर्पं ध्वंसयतीति । काम + ध्वन्स् + णिच् + णिनिः ।) शिवः । इति हलायुधः ।

कामनः, त्रि, (कामयति इति । कम् + णिङ् + युच् ।) कामुकः । इत्यमरः । २ । १ । २४ ॥

कामना, स्त्री, (कम + अनुदात्तादेश्चेति णिङ्क्त्वात् भावे युच् टाप् च ।) इच्छा । इति हलायुधः ॥

कामन्धमी, [न्] पुं, (कामं यथेष्टं धमति । काम + ध्मा + णिनिः । बाहुलकात् धमादेशः । निपातनात् मुमि साधुः ।) कांस्यकारः । इति जटाधरः ॥

कामपत्नी, स्त्री, (कामस्य पत्नी ।) रतिः । इति शब्दरत्नावली ॥

कामपालः, पुं, (कामान् पालयति । काम + पाल + अण् ।) बलदेवः । इत्यमरः । १ । १ । २४ ॥

कामप्रदः, पुं, (कामं कामजरतिभेदं प्रददाति । काम + प्र + दा + कः ।) रतिबन्धविशेषः । यथा,—
"द्वौ पादौ स्कन्धसंलग्नौ कृत्वा लिङ्गं भगे तथा ।
कामयेत् कामुकः प्रीत्या बन्धः कामप्रदो हि सः" ॥
इति स्मरदीपिका ॥ (कामानां सर्व्वेषां पुरुषार्थानां प्रदः । विष्णुः । यथा महाभारते । १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥)

कामफलः, पुं, (कामं यथेष्टं फलमस्य ।) महाराजाम्रवृक्षः । इति राजनिर्घण्टः ॥

कामम्, व्य (कमेर्णिजन्तात् अमु ।) अकामानुमतिः । इत्यमरः ।३।४।१२॥ (यथा, शाकुन्तले ५ अङ्के